चवी ५। इति भरतः॥ चविः ६। इति शब्दरत्नावली॥ तेजोवती ७ कोला ८ नाकुली ९ उषणा १० चव्यकम् ११ वशिरः १२ गन्धनाकुली १३ वल्ली १४ कोलवल्ली १५ कोलम् १६ कुटिलपत्रकम् १७ तीक्ष्णम् १८ करिकरणावल्ली १९ ह्रकरः २०। (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये।

"सारिवाद्वययष्ट्याह्वचविकारक्तचन्दनैः॥")

अस्या गुणाः। कटुत्वम्। उष्णत्वम्। लघुत्वम्। रोचनत्वम्। दीपनत्वम्। जन्तुक्रिकासश्वासशूलनाशित्वञ्च। इति राजनिर्घण्टः॥ भेदकत्वम्। कफनाशित्वञ्च। इति राजवल्लभः॥

चवी, स्त्री, (चवि+"कृदिकारादक्तिनः।" ४।१।४५। इति ङीष्।) चविका। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ६।१५१।

"सर्व्ववर्म्मा चवीहस्तः प्रतिज्ञां तां सुदुस्तराम्।
पश्यन् सानुशयः सर्व्वं स्वभार्य्यायै शशंस तत्॥")

चव्यं, क्ली, (चर्व्व्यते इति। चर्व्व+ण्यत्। पृषोदरादित्वात् रलोपे साधुः।) चविका। इत्यमरः। २।४।९८॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये।

"चव्येन्द्रयवं त्रिफला सर्पिर्म्मांसरसाम्बुभिः॥")

चव्यकं, क्ली, (चव्यमेव। स्वार्थे कन्।) चविका। इति राजनिर्घण्टः॥

चव्यजा, स्त्री, (चव्यमिव जायते इति। जन+डः।) गजपिप्पली। इति राजनिर्घण्टः॥ (विवृतिरस्या गजपिप्पलीशब्दे ज्ञेया॥)

चव्यफलं, क्ली, (चव्यमिव फलं यस्य।) गजपिप्पली। इति राजनिर्घण्टः॥

चव्या, स्त्री, (चव्य+टाप्।) चविका। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये।

"सर्पिर्म्मधुभ्यां त्रिकटु प्रलिह्या-
च्चव्याविडङ्गोपहितं वयार्त्तः॥")

वचा। इति मेदिनी॥ कार्पासी। इति राजनिर्घण्टः॥

चष, वधे। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) चषति। इति दुर्गादासः॥

चष, ऋ भक्षे। इति कविकल्पद्रुमः॥ (भ्वा-उभं-सकं-सेट्।) ऋ, चषति चषते। इति दुर्गादासः॥

चषकः, पुं, क्ली, (चषति भक्षयति पिबत्यनेनेत्यर्थः। चष+"क्वुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि।" उणां। २।३२। इति क्वुन्।) मद्यपानपात्रम्। तत्पर्य्यायः। गल्वर्कः २ सरकः ३ अनुतर्षणम् ४। इति हेमचन्द्रः। ४।१०२४॥ *॥

अथ चषकोद्देशः।

"यत् पानपात्रं भूपानां तज्ज्ञेयं चषकं बुधैः।
कानकं राजतञ्चैव स्फाटिकं काचमेव च॥
रत्नं खराद्दितकोणं चतुर्णां पृथिवीभुजाम्।
इत्यन्यसम्मतं तेषां निर्णयः प्राज्ञसम्मतः॥
स्वसुष्ठिसम्मितं रत्नैश्चतुर्व्वर्णैः समन्वितम्।
मार्त्तिकं वाथ फालं वा सर्व्वथासुपयुज्यते॥
काष्ठजं धातुजं शैलं जाङ्गलादि महीभुजाम्।
यदन्यत्तोयपानादि पात्रं पृथ्वीभुजां भवेत्॥"

एवं तत्रापि नियम इति भोजस्य निश्चयः। इति युक्तिकल्पतरुः॥ *॥ सुरापात्रम्। मधु। मद्यप्रभेदः। इति मेदिनी। के, ८६॥

चषतिः, पुं, (चष भक्षे वधे वा+भावे अतिः।) भक्षणम्। वधः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

चषालः, पुं, (चष्यते वध्यते पशुः। चष+"सानसिवर्णसीति।" उणां। ४।१०७। इति आल प्रत्ययेन निपातनात् साधुः।) यूपकटकः। इत्यमरः। २।७।१८॥ यज्ञसमाप्तौ पशुबन्धनाद्यर्थं यज्ञभूमौ यत् काष्ठमारोप्यते स यूपः तस्य शिरसि वलयाकृतिर्डमरुकाकृतिर्व्वा यः काष्ठविकारः सः। यूपमूले विहितलोहवलयञ्च। इति केचित्। इति भरतः॥ मधुस्थानम्। इति संक्षिप्तसारे उणादिवृत्तिः॥

चह, शाठ्ये। प्रतारणे इति यावत्। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) चहति। इति दुर्गादासः॥

चह, त् क शाठ्ये। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) चहयति खलः। इति दुर्गादासः॥

चह, क म शाठ्ये। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क म, चहयति खलः साधुं प्रतारयतीत्यर्थः। इति दुर्गादासः॥

चाकचक्यं, क्ली, उज्ज्वलता। चक्‌चक् इति भाषा। यथा, न हि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव तथा हि। काचादिदोषदूषितलोचनस्य पुरोवर्त्तिद्रव्यसंयोगादिदमाकारा चाकचक्याकारा च काचिदन्तःकरणवृत्तिरुदेति। इति वेदान्तपरिभाषा॥

चाकचिका, स्त्री, श्वेतगुञ्जा। इति रत्नमाला॥

चाक्रिकः, पुं, (चक्रेण सम्मूहेन यन्त्रविशेषेण वा चरतीति। चक्र+"चरति।" ४।४।८। इति ठक्।) बहुभिर्मिलित्वा यः स्तौति सः। तत्पर्य्यायः। घाण्टिकार्थकः २। इत्यमरः। २।८।९७॥ (यथा, याज्ञवल्क्ये। १।१६५।

"पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनाम्।
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा॥")

तैलकारः। इति हेमचन्द्रः॥ शाकटिकः। इति महाभारते राजधर्म्मः॥ गाड़ोयान् इति भाषा॥

चाक्षुषं, क्ली, (चक्षुषा निर्वृत्तम्। चक्षुष्+"तेन निर्वृत्तम्।" ५।१।७९। इत्यण्।) प्रत्यक्षविशेषः। तत्तु चक्षुरिन्द्रियजन्यज्ञानम्। द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्। द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः। द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः। इति सिद्धान्तमुक्तावली॥ तथा च।

"द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः।
द्रव्येषु समवेतानां तथा तत्समवायतः॥
तत्रापि समवेतानां शब्दस्य समवायतः।
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः॥"

इति भाषापरिच्छेदे॥ ५९—६०॥ (चक्षुषा गृह्यते इति। चक्षुष+अण्। चक्षुर्ग्राह्यरूपादि। चक्षुर्ग्राह्ये, त्रि॥)

चाक्षुषः, पुं, (चक्षुषः ब्रह्मणो लोचनात् जातः। चक्षुष्+अण्। एतन्निरुक्तिर्यथा, मार्कण्डेये। ७६।२।

"अन्यजन्मनि जातोऽसौ चक्षुषः परमेष्ठिनः।
चाक्षुषत्वमतस्तस्य जन्मन्यस्मिन्नपि द्विज!॥")

षष्ठमनुः। अस्मिन्मन्वन्तरे अजितनामको विष्णोरवतारः। मन्त्रद्रुम इन्द्रः। आप्यादयो देवाः। हविष्मद्वीरकादयः सप्तर्षयः। पुरुपुरुषसुद्युम्नादयो मनुपुत्राः। इति श्रीभागवतम्॥ (अस्य अन्यद्विवरणं मन्वन्तरशब्दे द्रष्टव्यम्॥)

चाङ्गः, पुं, (चीयते इति। चि+डः। चमङ्गं यस्य।) चाङ्गेरी। इत्यमरटीकायां रायमुकुटः॥

चाङ्गेरी, स्त्री, (चाङ्गं ईरयतीति। ईर+अण्। ततो ङीष्।) अम्ललोणिका। इत्यमरः। २।४।१४०॥ ("ग्रहण्यर्शोविकारघ्नी साम्ला वातकफे हिता। उष्णा कषायमधुरा चाङ्गेरी चाग्निदीपनी॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

चाचपुटः, पुं, तालभेदः। यथा,—

"गुरुर्लघुः प्लुतश्चैव भवेच्चाचपुटाभिधे॥"

इति सङ्गीतदामोदरः॥

चाञ्चल्यं, क्ली, (चञ्चलस्य भावः। चञ्चल+ष्यञ्।) चञ्चलता। चापल्यम्। यथा —

"चाञ्चल्यरहिता लक्ष्मीः पुत्रपौत्रावधिस्थिरा॥"

इति जगन्मङ्गलाख्यकवचम्॥

चाटः, पुं, (चट्यते भिद्यते यस्मात्। चट+घञ्। यद्वा चटति भिनत्ति भित्त्यादिकम्। चट+णः।) चौरः। इति मिताक्षरा॥ प्रतारकः। यथा,—

"चाटतस्करदुर्व्वृत्तमहासाहसिकादिभिः।
पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः॥"

चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति। प्रच्छन्नापहारिणस्तस्कराः। दुर्व्वृत्ता इन्द्रजालिककितवादयः। सहो बलं सहसा बलेन कृतं साहसं महच्च तत् साहसञ्च महासाहसं तेन वर्त्तन्त इति महासाहसिकाः प्रसह्यापहारिणः। आदिशब्दात् मौलिककुहकवृत्तयः। एतैः पीड्यमाना बाध्यमानाः प्रजा रक्षेत्। कायस्था गणका लेखकाश्च तैः पीड्यमाना विशेषतो रक्षेत्। तेषां राजवल्लभतया अतिमायावितया च दुर्निवारत्वात्।" इति मिताक्षरायां आचाराध्यायः॥

चाटकेरः, पुं, (चटकस्य चटकाया वा पुमपत्यमिति। "चटकाया ऐरक्।" ४।१।१२८। इत्यैरक्प्रत्ययः। "चटकस्येति वाच्यम्। लिङ्गविशिष्टपरिभाषया स्त्रिया अपि" इति वार्त्तिकम्।) चटकस्य पुमपत्यम्। इत्यमरः॥ चटार छा इति भाषा॥